# भूमिका

भगवता पाणिनिना अष्टाध्यायी विरचिता। अष्टाध्याय्यामष्टावध्यायाः चतुष्पादाश्च प्रत्यध्यायं विराजन्ते। तामेव अष्टाध्यायीग्रन्थमाधारीकृत्य भट्टोजिदीक्षितेन कौमुदीनामधेयः ग्रन्थो विरचितः। इयं कौमुदी अवरोहः क्रमेण भट्टोजिदीक्षितेन विरचिता यतः ग्रन्थलेखनस्य द्वौ क्रमौ वर्तेते एकस्तावत् अवरोहक्रमः, अपरस्तावत् आरोहक्रमः, अधस्तात् उपरिगमनं क्रियते तदा आरोहक्रमः, उपरिष्टात् अधोगमनं क्रियते तदा अवरोहक्रमः, वैयाकरणनये अष्टौ स्फोटाः सन्ति तेषु वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः त्रिविधाः शब्दाः सन्ति, तेषां साधुत्वं व्याकरणेनैव बुध्यते।

वर्णस्फोटो नाम = प्रकृतिप्रत्ययः

पदस्फोटो नाम = पदमेव यथा – सुबन्तं तिङन्तञ्च

वाक्यस्फोटो नाम = पदसमूहः

एवञ्च त्रिविधाः ये स्फोटाः सन्ति समेषां शब्दानां साधुत्वं व्याकरणेनैव बोधनीयः,

यदि पूर्वं प्रकृति-प्रत्यययोः विवेचनमनन्तरं सुबन्तस्य तिङन्तस्य च विवेचनम्, अनन्तरं सुबन्ततिङन्तघटितसमूहात्मकवाक्यस्य यदि विवेचनं स्यात्, तदा अयमारोहक्रमः किन्तु तथा विवेचनं भट्टोजिदीक्षितेन नैव अकारि, अपि तु भट्टोजिदीक्षितेन सर्वप्रथमं वाक्यसाधुत्वाभिधायकं प्रकरणमलेखि, तच्च प्रकरणं सन्धिप्रकरणम् ,

तत्र (अष्टाध्यायाम्) षड्विधानि सूत्राणि सन्ति –

संज्ञा च परिभाषा च विधिर्नियम एव च।

अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

एतेषु षड्विधिषु संज्ञाविधायकं सूत्रम् -

### भूवादयो धातवः इति सूत्रम्

भूवादयः इति पदं प्रथमान्तम्, धातवः इत्यपि पदं प्रथमान्तम्।

सूत्रेऽस्मिन् समासः अस्ति (द्वन्द्वगर्भबहुव्रीहिः), '**प्रथमातिक्रमणे मानाभावात्** ' इति रीत्या प्रथमः द्वन्द्वोपरि विचार आवश्यको दृश्यते, अतः पूर्वम् अस्माभिः द्वन्द्वोपरि विचारः क्रियते।

भूश्च वाश्च इति भूवौ (इतरेतरयोगद्वन्द्वः), आदिश्च आदिश्च इति आदी (एकशेषः), भूवौ आदी येषां ते भूवादयः (बहुव्रीहिः), प्रथमस्तु आदिः इति शब्दः व्यवस्थावाची वर्तते, द्वितीयः आदि इति शब्दः प्रकारवाची वर्तते।

अत्र जिज्ञासा जायते यद् अत्र द्वन्द्वसमासो भवति न वा ? यतो हि द्वन्द्वसमासः सहविवक्षायां भवति, सहविवक्षायाः लक्षणम् अस्ति -

**'एकधर्मावच्छिन्नस्य एकधर्मावच्छिन्नसंसर्गेण एकधर्मावच्छिन्नेऽन्वयः इति'**

लक्षणस्य समन्वयस्तावत् **'घटपटौ पश्य '** इत्यत्र क्रियते, एकधर्मावच्छिन्नस्य घटपटौ इति समुदायत्वावच्छिन्नस्य, एकधर्मावच्छिन्नसंसर्गेण कर्मत्वसंसर्गेण, एकधर्मावच्छिन्नः 'पश्य' इति क्रियायाम् अन्वयो वर्तते, अतः अत्र सहविवक्षायां सत्यां **'घटपटौ'** इत्यत्र द्वन्द्वसमासो भवति।

प्रकृतस्थले **'भू'** इत्यस्याभेदसम्बन्धेन व्यवस्थार्थक आदिशब्दे अन्वयो वर्तते, एवञ्च 'वा' इत्यस्य **स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेन** प्रकारार्थक आदिशब्दे अन्वयो वर्तते।

भिन्नसंसर्गेण भिन्ने स्थाने अन्वयकरणात् अत्र सहविवक्षा नास्ति, अतः ग्रन्थकारेण कथमत्र द्वन्द्वसमासः कृतः इति जिज्ञासा समुदेति।

तदा ग्रन्थकारो वदति यत् यथा **'आद्यन्तौ टकितौ'** इत्यत्र समुदायस्य समुदाये अन्वयं विधाय द्वन्द्वसमासो विहितः तथैव अत्रापि समुदायस्य समुदाये अन्वयं विधाय द्वन्द्वसमासो भविष्यति।

तथा हि भूवौ इति समुदायस्य आदी इति समुदाये **स्वघटकाभिन्नघटितत्वम्, स्वघटकनिष्ठप्रतियोगितानिरूपकसादृश्यवद्घटित्व**सम्बन्धेन अन्वयो भविष्यति।

समन्वयस्तावत् स्व – भुवौ तद्घटकः 'भू' इति तदभिन्नो व्यवस्थार्थक आदिः तद्घटितत्वम्, 'आदी' इति समुदाये, तथैव स्वम् – भुवौ तद्घटकः 'वा' इति शब्दः तन्निष्ठप्रतियोगितानिरूपकसादृश्यवद् प्रकारार्थकः आदिशब्दः तद्घटितत्वम् 'आदी' इति समुदाये एतद्रीत्या एकसंसर्गेण एकधर्मावच्छिन्ने अन्वयकारणात् अत्र सहविवक्षा वर्तते अतः द्वन्द्वसमासस्य भवने कापि क्षतिः नास्ति।

सम्प्रति सूत्रार्थो जायते – **भूप्रभृतयो वा सदृशाः धातुसंज्ञकाः स्युः** । सादृश्यं भ्वादौ क्रियावाचित्वेन अपेक्षितं वर्तते।

अतः परिष्कृतः अर्थः जायते – ' **क्रियावाचित्वे सति भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीमन्तः धातुसंज्ञकाः स्युः ।** अत्र क्रियापदेन साध्यक्रिया विवक्षिता वर्तते, साध्यक्रियायाः लक्षणं वर्तते- **क्रियान्तराकाँक्षानुत्थापकावच्छेदकधर्मवत्वम् इति ।** सादृश्यविषये सार्वत्रिको नियमो वर्तते यत् **प्रतियोगितावच्छेदकव्यापकीभूतधर्मेण** सादृश्यं गृह्यते।

यथा – **'चन्द्र इव मुखम्'** इति अत्र प्रतियोगी चन्द्रः प्रतियोगिता चन्द्रनिष्ठा तदवच्छेदकं चन्द्रत्वम्, तद्व्यापकीभूतो धर्मः आह्लादजनकत्वम् अतः आह्लादजनकत्वेन सादृश्यं गृह्यते।

प्रकृतस्थले सादृश्यस्य प्रतियोगी 'वा' प्रतियोगिता वा निष्ठा तदवच्छेदकं वात्वम् तद्व्यापकीभूतो धर्मः साध्यक्रियावाचित्वं भवितव्यं किन्तु व्यभिचारो वर्तते, यतो हि 'वा' इति अव्यये प्रतियोगितावच्छेदकः वात्वम् तु अस्ति किन्तु साध्यक्रियावाचित्वं नास्ति।

अतः **स्वाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वरूपं** व्यापकत्वस्य लक्षणम्, साध्यक्रियावाचित्वे नास्ति, अतः प्रतियोगितावच्छेदकव्यापकीभूतसाध्यक्रियावाचित्वाभावात् साध्यक्रियावाचित्वेन सादृश्यं कथं गृह्यते इति जिज्ञासा जायते।

तदा समाधानं क्रियते यद् **'वा'** इति शब्दः द्विधा वर्तते एकः विकल्पार्थकमव्ययम् अपरश्च गतिगन्धनार्थकः 'वा' इति धातुः। एतौ उभावपि 'वा' शब्दौ असत्ववाचिनौ वर्तेते। तत्साहचर्यात् 'भू' इति शब्दः अपि असत्ववाचित्वेन गृह्यते। असत्ववाची 'भू' इति शब्दः साध्यक्रियावाची वर्तते, अतः तत्साहचर्यात् 'वा' इति शब्दः अपि साध्यक्रियावाचित्वेनैव गृह्यते। एतावता परस्परसाहचर्यात् क्रियावाचित्वस्य लाभो भविष्यति।

यदि 'क्रियावाची' इति पदं सूत्रे न दीयते तर्हि सूत्रार्थो भवति **भ्वादिगणपठितानुपूर्वीसदृशानुपूर्विमत्वम्** इति।

ननु एतावदेव अर्थः स्वीक्रियते तदा को दोषः ? तदा उच्यते- यच्छब्दात् निष्पन्नः स्त्रीलिङ्गकः 'या' इति शब्दः अपि भ्वादिगणपठितः, 'या प्रापणे' इत्यानुपूर्वीसमानम् आपूर्वीकः वर्तते अतः यच्छब्दात् निष्पन्नः स्त्रीलिङ्गकः 'या' इति शब्दस्यापि धातुसंज्ञा भविष्यति। धातुसंज्ञया 'या' इति शब्दस्य द्वितीयायाः बहुवचने याः इत्यत्र 'आतोः धातोः' इत्यनेन सूत्रेण आकारस्य लोपापत्तिरूपदोषः आगच्छति, अत एव ग्रन्थकारेण क्रियावाचित्वपदं सूत्रे दत्तम्। क्रियावाचित्वपदं दानेन 'या' इत्यत्र क्रियावाचित्वं नास्ति, अतः धातुसंज्ञाकारलोपापत्तिरूपदोषः नायाति।

पुनरत्र जिज्ञासा जायते यत् यदि 'या' इति शब्दस्य धातुसंज्ञा स्यात् तदपि विप्रतिपत्तिर्नास्ति यतो हि या + शस् इत्यवस्थायां यदा 'आतो धातोः' इत्यनेन सूत्रेण आकारलोपं कर्तुं प्रवर्तते तदा बह्वापेक्षत्वेन बहिरङ्गं टाप् असिद्धं भविष्यति। लोपशास्त्रं केवलं शब्दकृतं निमित्तं याचते अतः अल्पापेक्षत्वेन अन्तरङ्गमस्ति।

टाप् इति प्रत्ययः स्त्रीत्वरूपार्थस्य विवक्षां करोति अतो बहिरङ्गमस्ति। अत अन्तरङ्गकार्ये कर्तव्ये सति बहिरङ्गकार्यम् असिद्धं भवति, इति रीत्या बहिरङ्गं टाप् प्रति अन्तरङ्गः आकारलोपः असिद्धः भविष्यति तदा दोषाभावात् क्रियावाचित्वम् इति पदस्य आवश्यकता नास्ति।

तदा उच्यते अत्र **'असिद्धबहिरङ्गमन्तरङ्गे'** इति परिभाषा न प्रवर्तते, यतो हि तस्याः निषेधिका परिभाषा वर्तते, ' **नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषा'** परिभाषायाः अर्थः अस्ति **अज्निष्ठान्यानन्तर्यनिरूपितान्तरङ्गे कार्ये कर्तव्ये जातस्य बहिरङ्गस्य नासिद्धिः।**

प्रकृतस्थले अन्तरङ्गशास्त्रं वर्तते **'आतो धातोः'** इति शास्त्रम्, **'आतो धातोः'** इत्यनेन सूत्रेण विधीयमानो लोपः अच्स्थानिको वर्तते, तथा च अज्भिन्नः भत्वेनाक्षिप्तप्रत्ययविशेषनिमित्तकः अपि अस्ति,

अतः अत्र परिभाषा प्रवर्तते। अतः लोपदृष्टौ टाप् इति प्रत्ययः असिद्धो न भविष्यति तदा याः पश्यति इत्यत्र लोपापत्तिरूपदोषः तदवस्थः तद्वारणाय क्रियावाचित्वम् इति विशेषणं सार्थकम् अस्ति।

पुनरुच्यते भगवता भाष्यकारेण **'क्त्वः श्नः'** इत्यादिप्रयोगसिद्ध्यर्थम् 'आतो धातोः' इत्यत्र वार्तिकं पठितम् **'आतोऽनापः'** इति अर्थात् आप्भिन्नः आकारस्य लोपो भवति, याः पश्यति इत्यत्र आप्सम्बन्धी आकारः वर्तते अतः लोपस्य प्राप्तिरेव नास्ति तद्वारणाय क्रियावाचित्वम् इति विशेषणं पुनरपि व्यर्थम्।

तदा पुनः वदति यदि क्रियावाचित्वपदं न दद्मः तर्हि विकल्पार्थकः 'वा' इति शब्दः अपि **भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वी** वर्तते। अतः एतस्यापि धातुसंज्ञा भविष्यति। धातुसंज्ञया 'वा' इति अव्ययस्य प्रातिपदिकसंज्ञा न भविष्यति यतो हि अधातुः इति निषेधः प्रवर्तते, अतः प्रातिपदिकत्वात् सुप् नागच्छति तदा **'वा'** इत्यत्र पदत्वस्य अनापत्तिरूपदोषः आपतति अतः एतद्दोषवारणाय क्रियावाचित्वम् इति विशेषणम् अपेक्षितम्।

पुनः **भ्वादयः इति पदं किमर्थं दीयते**, तदा उच्यते **हिरुक् पृथक्** इत्याद्यव्ययानां तथा च **'शिश्ये'** इति भावार्थतिङन्तस्यापि धातुसंज्ञा न स्यात्, तदर्थं भ्वादयः इति पदं दीयते। पददाने च हिरुक् पृथक् इत्याद्यव्ययानां भ्वादिगणपठितत्वाभावात् धातुसंज्ञा न भवति।

**'शिश्ये'** इत्यस्य धातुसंज्ञायाः भवनेऽपि विप्रतपत्तिः नास्ति, यतो हि धातुत्वात् तिङ् नागच्छति किमर्थम् इति चेत् तिङर्थः उक्तः अस्ति तस्मात् तदर्थप्रतिपादनाय पुनः तिङ् नागच्छति।

यदि वदामः धातुत्वात् **'शिश्ये'** इत्यत्र **'आदेच उपदेशेऽशिति'** इत्यनेन आत्वं भविष्यति इत्यपि वक्तुं न शक्यते यतो हि **'शिश्ये'** इत्यत्र उपदेशत्वं नास्ति केवलं धातुत्वम् एव वर्तते। अतः **'शिश्ये'** घटकः **'ए'** इत्यस्मिन् प्रत्यये धातुत्वस्य अनापत्तिः दातव्यम् **'शिश्ये'** इति तिङन्तस्थले उपदेशाभावात् कश्चन अपि दोषः नास्ति, अपि च आत्वं धातुत्वनिमित्तं नास्ति अपितु उपदेशनिमित्तकं वर्तते। तदा सूत्रार्थः जायते **क्रियावाचित्वे सति भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीमन्तः धातुसंज्ञकाः स्युः इति।**

यदि एतादृशं सूत्रार्थं स्वीकुर्मः तदा **'स्तम्भु' इत्यादि** धातूनां धातुसंज्ञा न भविष्यति, यतो हि एते सर्वे भ्यादिगणपठिताः न सन्ति। तदा समाधीयते **'स्तम्भु' इत्यादिनां** धातूनां धातुसंज्ञा उदित्करणात् भविष्यति अन्यथा उदित्करणं व्यर्थं स्यात् अतः उदित् इत्यनेन धातुसंज्ञायाः अनुमानं क्रियते। **'चुलुम्पादि'** इत्यत्र **'बहुलमेन्निदर्शनम्'** इति गणसूत्रेण धातुसंज्ञा भविष्यति। एतस्य गणसूत्रस्य अभिप्रायो वर्तते यत् एतन्निदर्शनम् अर्थात् भ्यादि इति निदर्शनम् बहुलाभिप्रायात् तस्मात् क्वचित् भ्वादिगणपठितत्वाभावेऽपि बाहुलकात् धातुसंज्ञा भविष्यति। तदा एतादृशस्य अर्थस्य स्वीकरणे नास्ति कुत्रापि दोषः। अस्मिन् सूत्रे बहुशास्त्रार्थः वर्तते सम्प्रति केवलम् एतावदेव।इत्यलम्

विष्णुप्रसाद उपाध्यायः